श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकादशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकादशः सर्गः ॥

## रावणस्य सन्देशं श्रुत्वा पितुराज्ञया लङ्कां हित्वा कुबेरस्य कैलासे गमनं लङ्कायां रावणस्याभिषेको रक्षसां वासश्च

सुमाली वरलब्धांस्तु ज्ञात्वा चैतान् निशाचरान्।
उदतिष्ठद् भयं त्यक्त्वा सानुगः स रसातलात्॥ 7.11.1 ॥

मारीचश्च प्रहस्तश्च विरूपाक्षो महोदरः।
उदतिष्ठन् सुसंरब्धाः सचिवास्तस्य रक्षसः॥ 7.11.2 ॥

सुमाली सचिवैः सार्धं वृतो राक्षसपुङ्गवैः।
अभिगम्य दशग्रीवं परिष्वज्येदमब्रवीत्॥ 7.11.3 ॥

दिष्ट्या ते वत्स सम्प्राप्तश्चिन्तितोऽयं मनोरथः।
यस्त्वं त्रिभुवनश्रेष्ठाल्लब्धवान् वरमुत्तमम्॥ 7.11.4 ॥

यत्कृते च वयं लङ्कां त्यक्त्वा याता रसातलम्।
तद्गतं नो महाबाहो महद्विष्णुकृतं भयम्॥ 7.11.5 ॥

असकृत् तद्भयाद् भग्नाः परित्यज्य स्वमालयम्।
विद्रुताः सहिताः सर्वे प्रविष्टाः स्म रसातलम्॥ 7.11.6 ॥

अस्मदीया च लङ्केयं नगरी राक्षसोषिता।
निवेशिता तव भ्रात्रा धनाध्यक्षेण धीमता॥ 7.11.7 ॥

यदि नामात्र शक्यं स्यात् साम्ना दानेन वानघ।
तरसा वा महाबाहो प्रत्यानेतुं कृतं भवेत्॥ **7.11.8** ॥

त्वं च लङ्केश्वरस्तात भविष्यसि न संशयः।
त्वया राक्षसवंशोऽयं निमग्नोऽपि समुद्धृतः॥ **7.11.9** ॥

सर्वेषां नः प्रभुश्चैव भविष्यसि महाबल।
अथाब्रवीद् दशग्रीवो मातामहमुपस्थितम्॥ **7.11.10** ॥

वित्तेशो गुरुरस्माकं नार्हसे वक्तुमीदृशम्।
साम्ना हि राक्षसेन्द्रेण प्रत्याख्यातो गरीयसा॥ **7.11.11** ॥

किञ्चिन्नाह तदा रक्षो ज्ञात्वा तस्य चिकीर्षितम्।
कस्यचित् त्वथ कालस्य वसन्तं रावणं ततः॥ **7.11.12** ॥

उक्तवन्तं तथा वाक्यं दशग्रीवं निशाचरः।
प्रहस्तः प्रश्रितं वाक्यमिदमाह सकारणम्॥ **7.11.13** ॥

दशग्रीव महाबाहो नार्हसे वक्तुमीदृशम्।
सौभ्रात्रं नास्ति शूराणां शृणु चेदं वचो मम॥ **7.11.14** ॥

अदितिश्च दितिश्चैव भगिन्यौ सहिते हि ते।
भार्ये परमरूपिण्यौ कश्यपस्य प्रजापतेः॥ **7.11.15** ॥

अदितिर्जनयामास देवांस्त्रिभुवनेश्वरान्।
दितिस्त्वजनयद् दैत्यान् कश्यपस्यात्मसम्भवान्॥ **7.11.16** ॥

दैत्यानां किल धर्मज्ञ पुरेयं सवनार्णवा।
सपर्वता मही वीर तेऽभवन् प्रभविष्णवः॥ **7.11.17** ॥

निहत्य तांस्तु समरे विष्णुना प्रभविष्णुना।
देवानां वशमानीतं त्रैलोक्यमिदमव्ययम्॥ **7.11.18** ॥

नैतदेको भवानेव करिष्यति विपर्ययम्।
सुरासुरैराचरितं तत् कुरुष्व वचो मम॥ **7.11.19**॥

एवमुक्तो दशग्रीवः प्रहृष्टेनान्तरात्मना।
चिन्तयित्वा मुहूर्तं वै बाढमित्येव सोऽब्रवीत्॥ **7.11.20**॥

स तु तेनैव हर्षेण तस्मिन्नहनि वीर्यवान्।
वनं गतो दशग्रीवः सह तैः क्षणदाचरैः॥ **7.11.21**॥

त्रिकूटस्थः स तु तदा दशग्रीवो निशाचरः।
प्रेषयामास दौत्येन प्रहस्तं वाक्यकोविदम्॥ **7.11.22**॥

प्रहस्त शीघ्रं गच्छ त्वं ब्रूहि नैर्ऋतपुङ्गवम्।
वचसा मम वित्तेशं सामपूर्वमिदं वचः॥ **7.11.23**॥

इयं लङ्का पुरी राजन् राक्षसानां महात्मनाम्।
त्वया निवेशिता सौम्य नैतद् युक्तं तवानघ॥ **7.11.24**॥

तद् भवान् यदि नो ह्यद्य दद्यादतुलविक्रम।
कृता भवेन्मम प्रीतिर्धर्मश्चैवानुपालितः॥ **7.11.25**॥

स तु गत्वा पुरीं लङ्कां धनदेन सुरक्षिताम्।
अब्रवीत् परमोदारं वित्तपालमिदं वचः॥ **7.11.26**॥

प्रेषितोऽहं तव भ्रात्रा दशग्रीवेण सुव्रत।
त्वत्समीपं महाबाहो सर्वशस्त्रभृतां वर॥ **7.11.27**॥

तच्छ्रूयतां महाप्राज्ञ सर्वशास्त्रविशारद।
वचनं मम वित्तेश यद् ब्रवीति दशाननः॥ **7.11.28**॥

इयं किल पुरी रम्या सुमालिप्रमुखैः पुरा।
भुक्तपूर्वा विशालाक्ष राक्षसैर्भीमविक्रमैः॥ **7.11.29**॥

तेन विज्ञाप्यते सोऽयं साम्प्रतं विश्रवात्मज।
तदेषा दीयतां तात याचतस्तस्य सामतः॥ **7.11.30** ॥

प्रहस्तादपि संश्रुत्य देवो वैश्रवणो वचः।
प्रत्युवाच प्रहस्तं तं वाक्यं वाक्यविदां वरः॥ **7.11.31** ॥

दत्ता ममेयं पित्रा तु लङ्का शून्या निशाचरैः।
निवेशिता च मे रक्षो दानमानादिभिर्गुणैः॥ **7.11.32** ॥

ब्रूहि गच्छ दशग्रीवं पुरी राज्यं च यन्मम।
तत्राप्येतन्महाबाहो भुङ्क्ष्व राज्यमकण्टकम्॥ **7.11.33** ॥

अविभक्तं त्वया सार्धं राज्यं यच्चापि मे वसु।
एवमुक्त्वा धनाध्यक्षो जगाम पितुरन्तिकम्॥ **7.11.34** ॥

अभिवाद्य गुरुं प्राह रावणस्य यदीप्सितम्।
एष तात दशग्रीवो दूतं प्रेषितवान् मम॥ **7.11.35** ॥

दीयतां नगरी लङ्का पूर्वं रक्षोगणोषिता।
मयात्र यदनुष्ठेयं तन्ममाचक्ष्व सुव्रत॥ **7.11.36** ॥

ब्रह्मर्षिस्त्वेवमुक्तोऽसौ विश्रवा मुनिपुङ्गवः।
प्राञ्जलिं धनदं प्राह शृणु पुत्र वचो मम॥ **7.11.37** ॥

दशग्रीवो महाबाहुरुक्तवान् मम सन्निधौ।
मया निर्भर्त्सितश्चासीद् बहुशोक्तः सुदुर्मतिः॥ **7.11.38** ॥

स क्रोधेन मया चोक्तो ध्वंससे च पुनः पुनः।
श्रेयोऽभियुक्तं धर्म्यं च शृणु पुत्र वचो मम॥ **7.11.39** ॥

वरप्रदानसम्मूढो मान्यामान्यं सुदुर्मतिः।
न वेत्ति मम शापाच्च प्रकृतिं दारुणां गतः॥ **7.11.40** ॥

तस्माद् गच्छ महाबाहो कैलासं धरणीधरम्।
निवेशय निवासार्थं त्यक्त्वा लङ्कां सहानुगः॥ **7.11.41** ॥

तत्र मन्दाकिनी रम्या नदीनामुत्तमा नदी।
काञ्चनैः सूर्यसङ्काशैः पङ्कजैः संवृतोदका॥ **7.11.42** ॥

कुमुदैरुत्पलैश्चैव अन्यैश्चैव सुगन्धिभिः।
तत्र देवाः सगन्धर्वाः साप्सरोरगकिन्नराः॥ **7.11.43** ॥

विहारशीलाः सततं रमन्ते सर्वदाश्रिताः।
नहि क्षमं तवानेन वैरं धनद रक्षसा॥ **7.11.44** ॥

जानीषे हि यथानेन लब्धः परमको वरः॥ **7.11.45** ॥

एवमुक्तो गृहीत्वा तु तद्वचः पितृगौरवात्।
सदारपुत्रः सामात्यः सवाहनधनो गतः॥ **7.11.46** ॥

प्रहस्तोऽथ दशग्रीवं गत्वा वचनमब्रवीत्।
प्रहृष्टात्मा महात्मानं सहामात्यं सहानुजम्॥ **7.11.47** ॥

शून्या सा नगरी लङ्का त्यक्त्वैनां धनदो गतः।
प्रविश्य तां सहास्माभिः स्वधर्मं तत्र पालय॥ **7.11.48** ॥

एवमुक्तो दशग्रीवः प्रहस्तेन महाबलः।
विवेश नगरीं लङ्कां भ्रातृभिः सबलानुगैः॥ **7.11.49** ॥

धनदेन परित्यक्तां सुविभक्तमहापथाम्।
आरुरोह स देवारिः स्वर्गं देवाधिपो यथा॥ **7.11.50** ॥

स चाभिषिक्तः क्षणदाचरैस्तदा
निवेशयामास पुरीं दशाननः।

निकामपूर्णा च बभूव सा पुरी
    निशाचरैर्नीलबलाहकोपमैः ॥ **7.11.51** ॥

धनेश्वरस्त्वथ पितृवाक्यगौरवा -
    न्न्यवेशयच्छशिविमले गिरौ पुरीम्।
स्वलङ्कृतैर्भवनवरैर्विभूषितां
    पुरन्दरः स्वरिव यथामरावतीम्॥ **7.11.52** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकादशः सर्गः ॥